International Journal of Sanskrit Research 2025; 11(3): 400-402

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2025; 11(3): 400-402
© 2025 IJSR
www.anantaajournal.com
Received: 03-04-2025
Accepted: 06-05-2025

**B Mohan Kumar**
Research-scholar, National Sanskrit University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**B Mohan Kumar**
Research-scholar, National Sanskrit University, Tirupati, Andhra Pradesh, India

# भारतीयपरम्परायाम् अलङ्कारसिद्धान्तस्य विकासयात्रा (आभरताद् जगन्नाथपर्यन्तम्)

**B Mohan Kumar**

**सारांश**

प्रस्तुतोऽयं प्रबन्धः साहित्यशास्त्रस्य उत्पत्तिविकासप्रयोजननि च संस्कृतसाहित्यदृष्ट्या सविस्तरं प्रतिपादयति। एवं चात्र शास्त्रशब्दस्य व्युत्पत्तिं विशदीकृत्य "लक्ष्यानुरोधेन लक्षणसङ्गतिः" इति सिद्धान्तानुसारेण चतुर्विधपुरुषार्थसाधनतया शास्त्राणां प्रवृत्तिः निरूपिता।

अलङ्कारशब्दस्य निष्पत्तिं, तस्य काव्यशोभाकारित्वं, पूर्वसूरिणाम् आचार्याणाम् अलङ्कारलक्षणानि च प्रस्तावितानि। वामन-दण्डी-भामह-उद्भट-रुद्रट-मम्मट-विश्वनाथ-जयदेव-अप्पय्यदीक्षित-जगन्नाथादिभिः आचार्यैः कृतालङ्कारलक्षणानुशीलनेन तेषां ऐतिहासिकविकासं प्रस्तुतम् । शब्दालङ्काराः, अर्थालङ्काराः, उभयालङ्काराः इति अलङ्काराणां प्रमुखविभागः, तथैव रूय्यकप्रभृतिभिः प्रस्तुताः सादृश्यमूलकादयः सप्तविभागाः अपि स्पष्टीकृताः। अन्ते काव्ये अलङ्काराणां माहात्म्यं, तेषां रसोपकर्तृत्वं च प्रतिपादितम्।

**कूटशब्दाः** साहित्यशास्त्रम्, अलङ्कारशास्त्रम्, काव्यम्, पुरुषार्थाः, रसः, लक्ष्यम्, लक्षणम्, अलङ्काराः, शब्दालङ्काराः, अर्थालङ्काराः, उभयालङ्काराः, चमत्कारः

## प्रस्तावना

"शास्" (अनुशासने) धातोः निष्पन्नः शास्त्रशब्दः चतुर्विधपुरुषार्थानां (धर्मार्थकाममोक्षाणां) साधने प्रवृत्तिं नियमयति । "लक्ष्यानुरोधेन लक्षणसङ्गतिः" इति सिद्धान्तानुसारेण व्याकरणन्यायमीमांसादीनि यथा शास्त्ररूपेण प्रतिष्ठितानि, तथैव साहित्यमपि शास्त्रत्वेन परिगण्यते । अत्र लक्ष्याणि दृश्यश्रव्यादिरूपाणि काव्यानि, लक्षणं तु तेषां रसालङ्काररीतिवृत्त्यादिनिरूपकं तत्त्वज्ञानम् । पूर्वोक्तरीत्या शास्त्रं हि पुरुषार्थसाधनतया प्रयोजनवत्, तदत्रापि समानम्-साहित्यशास्त्रं हि काव्येन मानवं धर्मार्थकाममोक्षेषु न केवलं कान्तासम्मिततया प्रेरयति, अपि तु रसानुभूत्या परमानन्दं प्रापयति ।

एतच्च अभिराजयशोभूषणे सम्यङ्निरूतम् मिश्रवर्यैः तद्यथा त्रयाणां धर्मार्थकामानां वर्गः त्रिवर्गः ।तस्य सिद्धिः काव्यदेव । तथा चाग्निपुराणम् त्रिवर्गसाधनं नाट्यम् इति । नाट्यमित्युपलक्षणं काव्यस्यापि ।तत उक्तं ग्रन्थकृता त्रिवर्गेऽसंशयं सिद्धे काव्यनाट्योपसेवनैरिति ।चतुर्थो मोक्षपुरुषार्थः स्वयं सिद्धः प्रतिभाति ।स्वसहचरभूतानां धर्मार्तकामानां विरहमसहमान इवेत्युत्प्रेक्ष्यते ।[1] अस्मिन् शास्त्रे

[1] अभिराजयशोभूषणम् पुटसंख्या १८,१९

काव्यलक्षणप्रयोजनहेतुभेदादयः, शब्दशक्तयः, रसगुणरीत्यादयश्च निरूप्यन्ते। सत्स्वेवंभूतेषु विषयेषु पूर्वमस्य अलङ्कारशास्त्रमिति संज्ञा कथमिति प्रश्नः अवश्यं भवत्येव। कथमिति प्रश्नः अवश्यं भवत्येव।वस्तुतस्तु अतिप्राचीनकाले शास्त्रमिदं क्रियाकल्पनाम्नापि व्यवह्रियते स्म। वात्स्यायनेन कामसूत्रे चतुषष्टिकलासु क्रियाकल्पस्य गणना कृता । तत्र क्रियया काव्यग्रन्थाः, कल्पेन च विधानमभिप्रेतम् । तदनु यदा अलङ्कारशास्त्रमिति नाम आसीत्, तदा इतरेभ्योऽलङ्काराणामेव प्राधान्यं आसीत्।सौन्दर्यमलङ्कारः, काव्यं ग्राह्यमलङ्कारात् इत्यादि वचनान्यपि अमुमेवविषयं प्रमाणीकुर्वन्ति।परं तन्नाम न समुचितं यतोऽत्र अलङ्कारातिरिक्तानां बहूनां सहित्याङ्गानां विवेचनं वर्तते।अत एव इमामनुपपत्तिं मनसि निधाय यायावरीयः राजशेखरः पञ्चमी साहित्यविद्या इति अस्य साहित्यशास्त्रमिति नामकरणमकरोत्। ततः शास्त्रमिदम् साहित्यशास्त्रमिति नम्ना प्रचारं प्राप्तम् । तदनन्तरं साहित्यदर्पणः, साहित्यरत्नाकरः, साहित्यकौमुदि, साहित्यचिन्तामणिः, साहित्यबिन्दुः इत्यादि रचनाः सहित्यशास्त्रत्वं निरपयन्ति।

राजशेखरेण काव्यमीमांसायां साहित्यशास्त्रस्योत्पत्तिविषये एवं लिखितं –तत्र कविरहस्यं सहस्राक्षं समाम्नासीत्। औक्तिकमुक्तिगर्भः, रीतिनिर्णयं सुवर्णनाभः, यमकानि चित्रं चित्राङ्गदः, आनुप्रासिकं प्रचेतायनः, शब्दशेषं शेषः, वास्तव्यं पुलस्त्यः, औपम्यमौपकायनः, अतिशयं पराशरः, अर्थश्लेषमुतथ्यः, उभयालङ्कारिकं कुबेरः, वैनोदिकं कामदेवः, रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः, दोषाधिकरणं धिषणः, गुणौपादनिकमुपमन्युः, औपनिषदकं कुचमारः [2] इति। एतैः वाक्यैः प्रथमतः शास्त्रस्यास्य ज्ञानं परमेश्वरेण ब्रह्मणे प्रदत्तम्।तदनन्तरं ब्रह्मा सर्वेभ्यः देवेभ्यः ऋषिभ्यश्च शास्त्रमिदम् अध्यापयत्।ततः तदनुसारमेव अष्टादशशिष्याः तत्तद्विषयमधिकृत्य पृथक्-पृथक् ग्रन्थान् अरचयन्।

## अलङ्कार

अलम् इत्युपपदपूर्वकात् कृञ् धातो: अलंक्रियते अनेन इति करणार्थे घञि प्रत्यये अलङ्कारशब्दस्य निष्पत्तिः भवति । अस्य च अलङ्कारसाधनमिति अर्थः अलङ्करोति इति वा, अलंक्रियते अनेन इति वा अलङ्कारः उभयथापि अलङ्कारसाधनम् इति तु स्पष्टम्। यथा हरादयः शरीरशोभाकारिणः । तद्वत् काव्यशोभाकारिण: उपमादयः भवन्ति।यथा हि अङ्गनाशरीरं स्नाननिर्मलं, सुगन्धसुरभितं, दिव्याम्बरभूषितं, हारकुण्डलवलयादिमण्डितं सदैव पश्यज्जनाकर्षि भवति तथैव काव्यमपि काव्यशास्त्रलक्षितैरलङ्कारैः सुशोभितं मनोहरणाय प्रभवति । तथात्वे सत्येव कान्तावत् काव्येन श्रोतृपाठकानामभिमुखीकरणं तद्वारेण च सदुपदेशप्रदानं संसिद्ध्यति। न कान्तमपि निर्भूषं विभाति वनिताननम् [3] इति कथनानुसारं गुणगौरवसम्पन्नापि वनिता यथा सालङ्कारैरेव शोभते तद्वदेव काव्यमपि अलङ्कारैरेव शोभते। अत एव उक्तं वामनाचार्येण काव्यं ग्राह्यमलङ्कारात् [4] इति। उक्तञ्च् अग्निपुराणे अपि अलङ्काररहिता विधवैव सरस्वती [5] | दण्डिभामहोद्भटादयो प्राचीना: रूद्रटानन्दवर्धनाभिनवगुप्तादयश्च् मध्यमाः जगन्नाथादि अर्वाचीनाः आलङ्कारिका: स्वस्वविशिष्टसिद्धान्तस्थापकाः परस्परविरोधिनोऽपि अलङ्काराणां सौन्दर्याधायकत्वविषये तु निर्विरोधाः । एतैः आलङ्कारिकै: उक्तानि अलङ्कारलक्षणानि ईषद् अवलोकयामः

वामनः सौन्दर्यमलङ्कारः [6] इति निगदन् काव्यशास्त्रगतं सर्वमपि सौन्दर्यम् अलङ्कारे एव गृह्णाति। पुनरेवं भणति

**काव्यशोभायाः कर्तारो धर्माः गुणाः।**
**तदतिशयहेतवस्तु अलङ्काराः ॥** [7]

दण्ड्यानन्दवर्धनादि आचार्याः अलङ्कारान् हाराद्यलङ्कारतुल्यानीत्येव मन्वते।काव्यादर्शे आचार्यः दण्डी अलङ्कारमेवं निगदति।

**काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते।** [8]

ध्वनिकाराः यथा

**तमर्थमवलम्बन्ते येऽङ्गिणं ते गुणाः स्मृताः।**
**अङ्गाश्रितास्त्वलङ्काराः मन्तव्याः कटकादिवत् ॥** [9]

आचार्यमम्मटः काव्यप्रकाशे अलङ्कारानेवं निगदति|

**उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्ते ऽनुप्रासोपमादयः ॥** [10]

साहुत्यदर्पणकारेण विश्वनाथेन भणितम्

**शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।**
**रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ॥** [11]

---

[2] काव्यमीमांसा 2-

[3] काव्यालङ्कारः-१-२

[4] काव्यलङ्कारसूत्रम् १-१.२

[5] अग्नि पुराणे

[6] काव्यालङ्कारसूत्रम् १.१

[7] काव्यालङ्कारसूत्रम् ३.२

[8] काव्यदर्शः २.१

[9] ध्वन्यालोकः १-४

[10] काव्यप्रकाशः ८.६७

[11] साहित्यदर्पणम् १०.१

सुन्दरः वाक्यार्थोपस्कारकः शब्दार्थयोः धर्मः[12] इति पण्डितराजाः।

प्रागुक्तलक्षणेषु प्रायः सर्वेषामपि आलङ्कारिकाणामेकमेव मतं यत् शब्दार्थयो: शोभाकारिण: धर्माः अलङ्काराः इति । अलङ्काराः अङ्गदादिवत् शब्दार्थयो: शोभावर्धकाः रसादीनां च उपकर्तारः भवन्ति। इदमेव खलु अलङ्काराणाम् अलङ्कारत्वं यत् अङ्गद्वारेण अङ्गिन: उपकारकत्वम् । रसपरिप्लुता: अलङ्कारा: काव्यस्य शोभाधानेन सह अङ्गिनः अपि काचित् नवीनां शोभां वर्धयन्ति। यथा जगति अलंकृताः लोकाः उत्कृष्टाः मन्यन्ते तथैव अलङ्कारैः समन्वितानि काव्यान्यपि समुत्कृष्टानि मन्यन्ते । अलङ्कारसम्प्रदायानुयायिनां मतानुसारेण तु अलङ्काररहितकाव्यस्य कल्पना औष्ण्यरहितस्य अग्नेः कल्पनेव निरर्थका वर्तते। उक्तञ्च् जयदेवेन

**अङ्गीकरोति यः काव्यम् शब्दार्थावनलंकृती।**
**असौ न मन्यते कस्मादनुष्णमनलंकृती॥**[13]

### अलङ्काराणां विकास

रससिद्धान्तस्य प्रवर्तकेन भरतमुनिना नाट्यशास्त्रे सर्वादौ उपमा-रूपक-दीपक-यमकाख्याः चत्वारः एव अलङ्काराः विवेचिताः । वामनः काव्यलङ्कारसूत्रवृत्तौ त्रयस्त्रिंशत् अलङ्काराणां निरूपणमकरोत् । आचार्यो दण्डी काव्यादर्शे पञ्चत्रिंशत् अलङ्काराणां स्वीकरणमकरोत्। आचार्यो भामहः काव्यालङ्कारे एकोनचत्वारिंशत् अलङ्कारान् स्वीकरोति। उद्भटः काव्यालङ्कारसारसङ्ग्रहे एकचत्वारिंशत्। रूद्रट: स्वकीये काव्यालङ्कारग्रन्थे द्विपञ्चाशत् अलङ्काराणां विवेचनमकार्षीत् । काव्यप्रकाशकार: मम्मटाचार्य: सप्तषष्टिः अलङ्कारान् निरूपयत् । विश्वनाथः साहित्यदर्पणे चतुरशीतिः अलङ्कारान् निगदति। विद्यानाथः प्रतापरुद्रीये एकसप्ततिः। आचार्यो जयदेव: चन्द्रालोके शतं संख्याकानामलङ्काराणाम् निरूपणमकरोत्। अप्पयदीक्षितः स्वकीये कुवलयानन्दनामके ग्रन्थे चतुर्विंशत्यधिक एकशतम् अलङ्कारान् स्वीचकार । पण्डितराज जगन्नाथकृते रसगङ्गाधरे अशीत्यधिकशतम् अलङ्काराः विवेचिताः । एवम् अलङ्कारशास्त्रस्य ऐतिह्यम् अलङ्काराणाम् वृद्धिम् स्पष्टयति।

### अलङ्काराणां विभाग

**शब्दार्थयो:** अन्यतरस्य उपकारद्वारेण रसोपकारकत्वम् इति अलङ्कारसामान्यलक्षणम्। अर्थात् शब्दार्थदृष्ट्या अलङ्काराः त्रिविधा: -१) शब्दालङ्कारा: २) अर्थालङ्कारा: ३) उभयालङ्काराश्चेति

- **१) शब्दालङ्काराः** ये शब्दपरिवृत्तिं न सहन्ते ते च शब्दालङ्कारा: भवन्ति ।यथा अनुप्रासादय: । अर्थात् यत्र काव्ये शब्दस्य परिवर्तने सति चमत्काराभावः भवति तत्र शब्दालङ्कारत्वम्।
- **२) अर्थालङ्काराः** शब्दपरिवृत्तिसहत्वम् अर्थालङ्कारत्वम् इति कथनानुसारं यत्र काव्ये शब्दपरिवर्तनेऽपि न अर्थस्य हानि: ते अर्थालङ्काराः। यथा उपमादय:।
- **३) उभयालङ्काराः** यत्र क्वचित् शब्दपरिवृत्तिसहत्त्वं क्वचिच्च असहत्वं भवति ते उभयालङ्काराः यथा श्लेषादय:।

पुनश्च अलङ्कारसर्वस्वस्य निर्माता आचार्यो रूय्यक: सप्तषष्टिः अलङ्काराणां निरूपणं कृत्वा तेषां रचना शैल्यनुसारेण सप्तविभागेषु तान् व्यभजत् ।तद्वदेव परवर्तिभिरपि आचार्यैः विभाजनं क्रियते यथा-
१) सादृश्यमूलकाः २) विरोधमूला: ३) श्रृंखलामूलका: ४) तर्कन्यायमूलकाः ५) लोकन्यायमूलका: ६) वाक्यन्यायमूलका: ७) गूढार्थप्रतीतिमूलकाः अलङ्काराः इति।
एवं जीवने वस्त्राद्याभूषणानां यथा महत्यं तद्वदेव काव्ये अलङ्काराणामपि महत्वमिति ज्ञायते।
भारतीयसाहित्यपरम्परायाम् अलङ्कारसिद्धान्तस्य एषा विकासयात्रा आभरतादारभ्य जगन्नाथपर्यन्तं सर्जनात्मकं चिन्तनं प्रतिबिम्बयति। साहित्यशास्त्रस्य अलङ्कारशास्त्राद् आरभ्य साहित्यशास्त्रत्वेन प्रतिष्ठापनपर्यन्तं, लक्ष्यलक्षणविकासः अस्य शास्त्रस्य गतिशीलतायाः द्योतकः अस्ति। अलङ्काराणां मूलतत्त्वं–शब्दार्थयोः शोभातिशयसम्पादनमिति सर्वैराचार्यैः स्वीकृतम्, यद्यपि तेषां संख्या, वर्गीकरणं, लक्षणं इत्यादिविषयेषु मतभेदाः वर्तन्ते।
वामन-दण्डी-भामहादिभिः प्राचीनैः आचार्यैः दर्शितः मार्गः, उद्भट-रुद्रटादिभिः विस्तारितः, मम्मट-विश्वनाथादिभिः परिष्कृतः, जयदेव-अप्पय्यदीक्षित-जगन्नाथप्रभृतिभिः अर्वाचीनैः सुव्यवस्थितः।
अन्ततोगत्वा एषा सहस्राधिकवर्षात्मिका विकासयात्रा भारतीयकाव्यमीमांसायाः गहनचिन्तनस्य, सौन्दर्यानुभूतेः च शाश्वतं प्रमाणम् प्रकटयति।

### सन्दर्भग्रन्थसूची


1. भरतमुनिः. नाट्यशास्त्रम् (*Nāṭyaśāstraḥ*). नई दिल्ली: श्री सत्गुरु पब्लिकेशन्स; 2017. (अभिनवगुप्त द्वारा रचित अभिनवभारती टीका सहित).
2. भामहः. काव्यालङ्कारः (*Kāvyālaṅkāraḥ*). वाराणसी: चौखम्भा संस्कृत सीरीज़ ऑफिस; 2008.
3. दण्डी. काव्यादर्शः (*Kāvyādarśaḥ*). दिल्ली: मोतीलाल बनारसीदास; 2015.
4. वामनः. काव्यालङ्कारसूत्रवृत्तिः (*Kāvyālaṅkāra Sūtra Vṛttiḥ*). दिल्ली: परिमल पब्लिकेशन्स; 2012.
5. आनन्दवर्धनः. ध्वन्यालोकः (*Dhvanyālokaḥ*). कैम्ब्रिज: हार्वर्ड यूनिवर्सिटी प्रेस; 1990. (डेनियल एच.एच. इंगल्स द्वारा अनुवादित, अभिनवगुप्त की लोचन टीका सहित).
6. मम्मटः. काव्यप्रकाशः (*Kāvyaprakāśaḥ*). हैदराबाद: संस्कृत भाषा प्रचार समिति; 2009.
7. विश्वनाथः. साहित्यदर्पणः (*Sāhityadarpaṇaḥ*). वाराणसी: चौखम्भा संस्कृत सीरीज़ ऑफिस; 2013.
8. पण्डितराज जगन्नाथः. रसगङ्गाधरः (*Rasagaṅgādharaḥ*). दिल्ली: चौखम्भा सूरभारती प्रकाशन; 2018.
9. कीथ ए बी. संस्कृतसाहित्येतिहासः (History of Sanskrit Literature). दिल्ली: मोतीलाल बनारसीदास; 1993.


[12] रसगङ्गाधरः पुटसंख्या १५
[13] चन्द्रालोक १.८

10. रुय्यकः. अलङ्कारसर्वस्वम् (*Alaṅkārasarvasvam*). बड़ौदा: ओरिएंटल इंस्टीट्यूट; 2009. (कुमार स्वामिन् की संकेत टीका सहित).
11. अप्पय्यदीक्षितः. कुवलयानन्दः (*Kuvalayānandaḥ*). वाराणसी: चौखम्भा सूरभारती प्रकाशन; 2017.
12. जयदेवः. चन्द्रालोकः (*Candrālokaḥ*). वाराणसी: चौखम्भा संस्कृत सीरीज़ ऑफिस; 2011. (आलङ्कारशेखर टीका सहित).
13. अभिराज राजेन्द्र मिश्र. अभिराजयशोभूषणम् (*Abhirājayaśobhūṣaṇam*). इलाहाबाद: विजयन्त प्रकाशन; 2006.